**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तृतीया परीक्षा**

**दिनाङ्कः** – 02-02-2025 **अङ्काः** – १००

**पूर्वाह्णः** – १०:०० तः १:०० पर्यन्तम् **समयः** –होरात्रयम्

ಸೂಚನೆಗಳು: ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.

೨. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

1.**पञ्चानां संस्कृतेन एकवाक्येन उत्तरं लिखत।** 5

१. कीदृशाय शम्भवे नतिः ?

२ केन समस्या पूरिता ?

३ रामशुकः कुत्र न्यवसत् ?

४ द्रोणाचार्यः कः ?

५ वृक्षस्योपरि का स्थिता ?

6. मल्लस्य नाम किम् ?

2. **षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत।** 12

१. शङ्कराचार्येण स्थापिताः प्रसिद्धाः मठाः के ?

२ .भूतानां प्रलयोदयौ कौ ?

३. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान्?

४. कथम् अनार्यः पतति ?

५. केषां मतिः क्षीयते ?

६. हनुमान् सीतां कथम् आश्वासयामास ?

७. सुमतेः अभिप्रायः कः ?

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत।** 9

१. के के त्याज्याः ?

२. पतिव्रता ब्राह्मणं किम् उक्त्वा समाधानम् अकरोत् ?

३. एकलव्यः द्रोणसमीपमागत्य किमवदत् ?

४. विष्णुशर्मा राजानं किमवदत् ?

4. **चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत।** 12

१. मल्लस्य कथां विशदयत।

२. ब्राह्मणः सर्पश्च कथां लिखत।

३. विक्रमस्य कथां वर्णयत ।

४. पतिव्रतायाः महिमानं वर्णयत।

५. चित्रग्रीवकथां संगृह्य लिखत।

5. **चतुर्णां ससन्दर्भं मातृभाषया विवृणुत।** 12

१. 'राजा चार्तिहरो गुरुः' ।

२. "अतिथिसत्कारः श्रेयस्करः ।"

३ ."भो विप्र , नाहं बलाका ।

४. "अत्र स्थित्या वयं निहताः"।

५. " कुतो विद्यार्थिनः सुखम् "

6. **द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत।** 4

१. सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम्।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ॥

२. प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥

३. यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा॥

7. **श्लोकद्वयंपूरयत।** 4

१. निन्दन्तु ----------------------धीराः ॥

२. जयन्ति ----------------------भयम्॥

३. राजा ---------------------------वेत्ति॥

8. **अस्य गद्यस्य अनुवादं कुरुत।** 3

जगद्गुरुः शङ्कराचार्यः केरलेषु पूर्णानद्यास्तटे विद्यमानं कालटिनामकं ग्रामं स्वजन्मना अलञ्चकार । तस्य पिता परमभागवतः शिवगुरुः । जननी च धर्मशीला सती आर्याम्बा ।

9. **रिक्तस्थानानि पूरयत।** 3

१. यद्दत्त्वा च ----- भवेत्।

२. षोडशे कृतवान् --------।

३. कस्याः पुत्री ------- ।

10. त्रयाणां पर्यायपदानि लिखत। 3

१. तोयम्   २. धरणी   ३. विचक्षणाः   ४. यशः

11. त्रयाणां विरुद्धपदानि लिखत। 3

१. दिवा   २. बन्धनम्   ३. विग्रहः   ४. उपक्रमः

12. त्रीणि पदानि संस्कृतवाक्येषु योजयत। 3

१. आस्ताम्   २. दृष्ट्वा   ३. भूपालः   ४. आदाय

13. त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत। 3

१. अतस्तस्य   २. मन्वन्तरः   ३. समुद्रस्योपरि   ४. अत्रैव

14. वाक्यदोषं परिहरत।(त्रयाणाम् एव) 3

१. त्वं कार्यं कुरुत ।   २. भवान् गच्छ।

३. द्रोणस्य सह अर्जुनः अगच्छत्।   ४. शिवं नमः।

15. सुबन्त-तिङन्त-अव्ययानि पृथक् कृत्वा लिखत।

१. ततो राजा विष्णुशर्माणमाहूय प्रोवाच।   २. बालः गुरुकुलं गत्वा वेदान् अधीतवान्।

३. तत्र नानादेशादागत्य रात्रौ पक्षिणो निवसन्ति ।

16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत।(द्वयोः) 4

१. उद्योगिनं ------ लक्ष्मीः।   ३. प्रक्षालनाद्धि ---------वरम्।

२. क्लेशः ---------- विधत्ते।

17. संयोज्य लिखत। 4

| अ | आ |
|---|---|
| लट् | अयाचत |
| लिट् | निन्दन्तु |
| लङ् | वन्दते |
| लोट् | ददर्श |

18. **व्याकरणविशेषं लिखत ।** 2

१. कपोतराजः २. वसति स्म

19. **रेखाङ्कितमधिकृत्यप्रश्नवाक्यं कुरुत।** 2

१. *मल्लस्य* नाम वज्रजङ्घः इति । २. रामशुकः *साधुगृहे* न्यवसत् । ।

20. **समूहेतरपदं पृथक् कृत्वा लिखत।** 2

१. ययौ, ददौ, चकार, अयाचत २. रमेशः, उमेशः, वागीशः, गणेशः

21. **चतुर्थपदं लिखत।** 2

१ समवेताः – आगताः :: सन्नद्धाः ------

२. सुबन्तः – जश्त्व :: वाङ्मयः ----

22. **प्रयोगपरिवर्तनं कुरुत।** 2

१. नाहं विद्याविक्रयं करोमि । २. तेन कार्यं न कृतम् ।

************